तस्य भोगिनो भोगवेष्टित इव च्युतो मणिः॥५९॥ श्येनपक्षपरिधूसरालकाः सांध्यमेघरुधिरार्द्रवाससः॥ अंगना इव
रजस्वला दिशो नो बभूवुरवलोकनक्षमाः॥६०॥ भास्करश्च दिशमध्युवास यां तां श्रिताः प्रतिभयं ववासिरे॥ क्षत्रशो
णितपितृक्रियोचितं चोदयंत्य इव भार्गवं शिवाः॥६१॥ तत्प्रतीपपवनादिवैकृतं प्रेक्ष्य शांतिमधिकृत्य कृत्यवित॥ प्र

न्वयुं जगउमीश्वनः क्षितेः स्वंतमित्सलवपस्तमस्यधाम ॥६२॥ तेजसः सपदि राशिरुत्थितः प्रादुरास किल वाहिनी
मुखे ॥ यः प्रमृज्य नयनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात् ॥६३॥ पित्र्यमंशमुपवीतलक्षणं मातृकं च धनु
रूर्जितं दधत् ॥ यः ससोम इव धर्मदीधितिः सद्विजिह्व इव चंदनद्रुमः ॥६४॥ येन रोषपरुषात्मनः पितुः शास
ने स्थितिभिदोपि तस्थुषा वेपमानजननीशिरश्छिदा प्रागजीयत घृणा ततो मही ॥६५॥ अक्षबीजवलयेन नि
र्बभौ दक्षिणश्रवणसंस्थितेन यः ॥ क्षत्रियांतकरणैकविंशतेर्व्याजपूर्वगणनामिवोद्वहन् ॥६६॥ तं पितुर्वध
भवेन मन्युना राजवंशनिधनाय दीक्षितम् ॥ बालसूनुरवलोक्य भार्गवं स्वां दशां च विषसाद पार्थिवः ॥६७॥ नाम राम इति
तुल्यमात्मजे वर्तमानमहिते च दारुणे ॥ हृद्यमस्य भयदायि चाभवद्रत्नजातमिव हारसर्पयोः ॥६८॥ अर्घ्यमर्घ्यमि
ति वादिनं नृपं सोनवेक्ष्य भरताग्रजो यतः ॥ क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम् ॥६९॥ तेन कार्मुक
विषक्तमुष्टिना राघवो विगतभीः पुरोगतः ॥ अंगुलीविवरचारिणं शरं कुर्वता निजगदे युयुत्सुना ॥७०॥ क्षत्रजातम

पकारवैरिमेतन्निहत्यबहुशःशमंगतः॥सुप्तसर्पइवदंडघट्टनाद्रोषितोस्मितवविक्रमश्रवात्॥७१॥मैथिलस्यधनुरन्य
पार्थिवैस्त्वंकिलानमितपूर्वमक्षणोः॥तन्निशम्यभवतासमर्थयेवीर्यशृंगमिवभग्नमात्मनः॥७२॥अन्यदाजगतिराम
इत्ययंशब्दउच्चरितएवमामगात्॥व्रीडमावहतिमेससंप्रतिव्यस्तवृत्तिरुदयोन्मुखेत्वयि॥७३॥बिभ्रतोस्त्रमचलेप्य
कुंठितंद्वौमतौममनिरसमागसौ॥धेनुवत्सहरणाच्चहैहयस्त्वंचकीर्तिमपहर्तुमुद्यतः॥७४॥क्षत्रियांतकरणोपि
विक्रमस्तेनमामवतिनाजितेत्वयि॥पावकस्यमहिमासगण्यतेकक्षवज्ज्वलतिसागरेपियः॥७५॥तन्मदीयमिदमात्त
तस्प्रकंनीयमतोविजयसाधनंधनुः॥तिष्ठतुप्रधनमेवमप्यहंतुल्यबाहुतरसाजितस्त्वया॥७६॥कातरोसियदिवोद्ग
तार्चिषातर्जितःपरशुधारयामम॥ज्यानिघातकठिनांगुलिर्वृथाबध्यतामभययाचनांजलिः॥७७॥एवमुक्तवति
भीमदर्शनेभार्गवेस्मितविकंपिताधरः॥तद्धनुर्ग्रहणमेवराघवःप्रत्यपद्यतसमर्थमुत्तरम्॥७८॥पूर्वजन्मधनुषा
समागतःसोतिमात्रशुभदर्शनोभवत्॥केवलोपिसुभगोनवांबुदःकिंपुनस्त्रिदशचापलांछितः॥७९॥तेनभूमिनि

ति नैककोटिना कार्मुकं च बलिनाधिरोपितं ॥ प्रापवर्णविकृतिं च भार्गवो वृष्टिधौत इव वासवध्वजः ॥८०॥ तावुभावपि
परस्परस्थितौ वर्धमानपरिहीनतेजसौ ॥ पश्यति स्म जनता दिनात्यये पार्वणौ शशिदिवाकराविव ॥८१॥ तं कृपामृदु
रवेक्ष्य भार्गवं राघवः स्खलितवीर्यमात्मनि ॥ स्वं च संहितममोघमाशुगं व्याजहार हरसूनुसंनिभः ॥८२॥ न
प्रहर्तुमलमस्मि निर्दयं विप्र इत्यभिभवत्यपि त्वयि ॥ शंस किं गतिमनेन पत्रिणा हन्मि लोकमुत ते मखार्जितं ॥८३॥
प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां न वेद्मि पुरुषं पुरातनं ॥ गां गतस्य तव धाम वैष्णवं कोपितो ह्यसि मया दिदृक्षुणा ॥८४॥
भस्मसात्कृतवतः पितृद्विषः पात्रसाच्च वसुधां ससागरां ॥ आहितो जयविपर्ययोऽपि मे श्लाघ्य एव परमेष्ठिना त्वया
॥८५॥ तद्गतिं मतिमतां वरेप्सितां पुण्यतीर्थगमनाय रक्ष मे ॥ पीडयिष्यति न मां खिलीकृता स्वर्गपद्धतिरभोग
लोलुपं ॥८६॥ प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकं ॥ भार्गवस्य सुकृतोऽपि सोऽभवत्स्वर्गमार्गपरि
घोऽदुरत्ययः ॥८७॥ राघवोऽपि चरणौ तपोनिधेः क्षम्यतामिति वदन्समस्पृशत् ॥ निर्जितेषु तरसा तरस्विनां श

वपर्वार्हविलख्नस्सः ॥६॥ सद्धांतनासावरलेपिगेहे योगप्रभावोनवलक्ष्यतेते ॥ विमर्दिचाकांचनमंदिराणांनानाम्रणालिनीहै
मविपनाग ॥७॥ कात्वेशुभेकस्पपविगृहेवाकिंवामदर्थांगमकारणांते ॥ म्राचस्वमत्वावशिनोरक्षे नोमनःपनत्वीविमुखपु
वर्त्ति ॥८॥ नमवृवीत्साग३रणानवघापानीनपोनाःस्वपदोन्मुखेन ॥ नेस्याःपुनःसंपृतिवीतनाथांजाबीहिनाजन्नधिदेवतो
मां ॥९॥ वस्वौकसारामभिभ्रपसाहंसोनाउपवफोत्सवयाविभ्रत्या ॥ समग्नसत्कौत्वपिसर्यवंशेसतिपपन्नाकरुणामवस्था ॥१०॥
विशीर्णनस्योगृहसंनिवेशःपर्यस्तशालःप्रभुनाविनामे ॥ विडंवयसस्तनिमग्नसूर्यंदिनान्तमुग्रानिलभिन्नमेघं ॥११॥ नि
शासुभास्वत्कलनूपुराणांयःसंचरोऽभूदभिसारिकाणां ॥ नदन्मुखोल्काविचितामिषाभिःसवाह्यतेराजपथःशिवाभिः ॥१२॥
म्रास्फालितंयत्प्रमदाकराग्रैर्मृदंगधीरध्वनिमन्वगच्छत् ॥ वन्यैरिदानीमहिषैस्तदंभःशृंगाहतंक्रोशतिदीर्घिकाणां ॥१३॥
वृक्षेशयायष्टिनिवासभंगान्मृदंगशब्दापगमादलास्याः ॥ प्राप्तादवोल्काहतशेषबर्हाःक्रीडामयूरावनबर्हिणत्वं ॥१४॥ सो
पानमार्गेषुचयेषुरामानिक्षिप्तवेसश्चरणान्सरागान् ॥ सद्योहतन्यंकुभिरस्रदिग्धंव्याघ्रैःपदंतेषुनिधीयतेमो ॥१५॥ चि

चित्रद्विपाः पद्मवनावतीर्णाः करेणुभिर्दत्तमृणालभंगाः ॥ नखांकुशाघातविभिन्नकुंभाः संरब्धसिंहप्रहृतं वहंति ॥ १६ ॥
स्तंभेषु योषित्प्रतियातनानामुत्क्रांतवर्णक्रमधूसराणां ॥ स्तनोत्तरीयाणि भवंति संगान्निर्मोकपट्टाः फणिभिर्विमुक्ताः ॥ १७
कालांतरश्यामसुधेषु नक्तमितस्ततो रूढतृणांकुरेषु ॥ त एव मुक्तागुणशुद्धयोपि हर्म्येषु मूर्छंति न चंद्रपादाः ॥ १८ ॥
आवर्ज्य शाखाः सदयं च यासां पुष्पाण्युपात्तानि विलासिनीभिः ॥ वन्यैः पुलिंदैरिव वानरैस्ताः क्लिश्यंत उद्यानलता
मदीयाः ॥ १९ ॥ रात्रावनाविष्कृतदीपभासः कांतामुखश्रीवियुता दिवापि ॥ तिरस्क्रियंते कृमितंतुजालैर्विच्छिन्नधूमप्रस
रा गवाक्षाः ॥ २० ॥ बलिक्रियावर्जितसैकतानि स्नानीयसंसर्गमनाप्नुवंति ॥ उपांतवानीरगृहाणि दृष्ट्वा शून्यानि दूये स
रयूजलानि ॥ २१ ॥ तदर्हसीमां वसतिं विसृज्य मामभ्युपेतुं कुलराजधानीं ॥ हित्वा तनुं कारणमानुषीं तां यथा गुरुस्ते परमा
त्ममूर्तिं ॥ २२ ॥ तथेति तस्याः प्रणयं प्रतीतः प्रत्यग्रहीत्प्राग्रहरो रघूणां ॥ पूरप्यभिव्यक्तमुखप्रसादा शरीरबंधेन तिरोबभूव ॥
२३ ॥ तदद्भुतं संसदि रात्रिवृत्तं प्रातर्द्विजेभ्यो नृपतिः शशंस ॥ श्रुत्वा त एनं कुलराजधान्या साक्षात्पतित्वे वृतमभ्यनंदन् २४

कुशावतींश्रोत्रियसात्सकृत्वायात्रानुकूलेहनिसावरोधः ।। अनुद्रुतोवायुरिवाभ्रवृंदैःसन्यैनयोध्याभिमुखप्रतस्थे ।। २५ ।। सा
केतुमालोपवनावृहद्भिर्विहारशैलानुगतेवनागैः ।। सेनारथोदारगृहाप्रयाणेतस्याभवज्जंगमराजधानी ।। २६ ।। तेनातप
त्रामलमंडलेनप्रस्थापितःपूर्वनिवासभूमिं ।। बभौबलौघःशशिनोदितेनवेलामुदन्वानिवनीयमानः ।। २७ ।। तस्यप्रयातस्यव
रूथिनीनांपीडामपर्याप्तवतीवसोढुं ।। वसुंधराविष्णुपदंद्वितीयमध्यारुरोहेवरजश्छलेन ।। २८ ।। उद्यच्छमानागमनायपश्चा
त्पुरोनिवेशेपथिचव्रजंती ।। सायत्रसेनाददृशेनृपस्यतत्रैवसामग्र्यमतिंचकार ।। २९ ।। तस्यद्विपानांमदवारिसेकात्खुराभिघा
ताच्चतुरंगमाणां ।। रेणुःप्रपेदेपथिपंकभावंपंकोपिरेणुत्वमियायनेतुः ।। ३० ।। मार्गैषिणीसाकटकांतरेषुवैंध्येषुसेनाबहुधाविभिन्ना
चकाररेवेवमहाविरावाबद्धप्रतिश्रुंतिगुहामुखानि ।। ३१ ।। सधातुभेदारुणयाननेमिःप्रभुःप्रयाणध्वनिमिश्रतूर्यः ।। व्यलंघ
यद्विंध्यमुपायनानिपश्यन्पुलिंदैरुपपादितानि ।। ३२ ।। तीर्थेतदीयेगजसेतुबंधात्प्रतीपगामुत्तरतोस्यगंगां ।। अयत्नवालव्य
जनीबभूवुर्हंसानभोलंघनलोलपक्षाः ।। ३३ ।। सपूर्वजानांकपिलेनरोषाद्भस्मावशेषीकृतविग्रहाणां ।। सुरालयप्राप्ति

र॰ वं॰ ६४

निमित्तमंभस्त्रैस्रोतसं नौलुलितं ववंदे ॥३४॥ इत्यध्वनः कैश्चिदहोभिरंते कूलं समासाद्य कुशः सरय्वाः । वेदिप्रतिष्ठान्वितता
ध्वराणां यूपानपश्यच्छतशो रघूणां ॥३५॥ आधूय शाखाः कुसुमद्रुमाणां स्पृष्ट्वा च शीतान्सरयूतरंगान् । तं क्लांतसैन्यं कुल
राजधान्याः प्रत्युज्जगामोपवनांतवातः ॥३६॥ अथोपशल्ये रिपुमग्नशल्यस्तस्याः पुरः पौरसखः स राजा । कुलध्वजस्ता
निचलध्वजानि निवेशयामास बली बलानि ॥३७॥ तां शिल्पिसंघाः प्रभुणा प्रयुक्तास्तथागतां संभृतसाधनत्वात् । पुरं नवी
चक्रुरपां विसर्गान्मेघा निदाघग्लपितामिवोर्वीं ॥३८॥ ततः सपर्यां सपशूपहारां पुरः परार्ध्यप्रतिमागृहायाः । उपोषितै
र्वास्तुविधानविद्भिर्निर्वर्तयामास रघुप्रवीरः ॥३९॥ तस्याः स राजोपपदं निशांतं कामीव कांताहृदयं प्रविश्य । यथार्हमन्यै
रनुजीविलोकं संभावयामास गृहैस्तदीयैः ॥४०॥ सा मंदुरासंश्रयिभिस्तुरंगैः शालाविधिस्तंभगतैश्च नागैः । पूराबभा
से विपणिस्थपण्या सर्वांगनद्धाभरणेव नारी ॥४१॥ वसन्स तस्यां वसतौ रघूणां पुराणशोभामधिरोपितायां । न मैथिले
यः स्पृहयांबभूव भर्त्रे दिवो नाप्यलकेश्वराय ॥४२॥ अथास्य रत्नग्रथितोत्तरीयमेकांतपांडुस्तनलंबिहारं । निश्वास

रामः ६४

हार्य्यांशुकमाजगाम घर्मः प्रियावेषमिवोपदेष्टुं ॥४३॥ अगस्त्यचिह्नादयनात्समीपं दिगुत्तरा भास्वति संनिवृत्ते ॥ आ
नंदशीतामिव बाष्पवृष्टिं हिमस्रुतिं हैमवतीं ससर्ज ॥४४॥ प्रवृद्धतापो दिवसोतिमात्रमत्यर्थमेव क्षणदा च तन्वी ॥ उभौ
विरोधक्रियया विभिन्नौ जायापती सानुशयाविवास्तां ॥४५॥ दिने दिने शैवलवंत्यधस्तात्सोपानपर्वाणि विमुंचदंभः ॥ उ
द्दंडपद्मं गृहदीर्घिकाणां नारीनितंबद्वयसं बभूव ॥४६॥ वनेषु सायंतनमल्लिकानां विजृंभणोद्गंधिषु कुड्मलेषु ॥ प्रत्येकनि
क्षिप्तपदः सशब्दः संख्यामिवैषां भ्रमरश्चकार ॥४७॥ स्वेदानुविद्धार्द्रनखक्षतांके भूयिष्ठसंदष्टशिखं कपोले ॥ च्युतं न क
र्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात ॥४८॥ यंत्रप्रवाहैः शिशिरैः परीतान्रसेन धौतान्मलयोद्भवस्य ॥ शिला
विशेषानधिशय्य निन्युर्धारागृहेष्वातपमृद्धिमंतः ॥४९॥ स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायंतनमल्लिकेषु
कामो वसंतात्ययमंदवीर्यः केशेषु लेभे बलमंगनानां ॥५०॥ आपिंजरा बद्धरजःकणत्वान्मंजर्युदारा शुशुभेर्जुनस्य ॥ दग्ध्वा
पि देहं गिरिशेन रोषात्खंडीकृता ज्येव मनोभवस्य ॥५१॥ मनोज्ञगंधं सहकारभंगं पुराणसीधुं नवपाटलं च ॥ संबध्नता का

र॰वु॰ ६५

मिञ्जनेषु दोषाः सर्वे निदाघावधिना प्रमृष्टाः ॥५२॥ जनस्य तस्मिन्समये विगाढे बभूवतुर्द्वौ सविशेषकान्तौ ॥ तापापनोदक्ष
मपादसेव्यौ स दोदयस्थो नृपतिः शशी च ॥५३॥ अथोर्मिलोलोन्मदराजहंसे रोधोलतापुष्पवहे सरय्वाः ॥ विहर्तुमिच्छा वनिता
सखस्य तस्याम्भसि ग्रीष्मसुखे बभूव ॥५४॥ स तीरभूमौ विहितोपकार्यामानायिभिस्तामपकृष्टनक्रां ॥ विगाहितुं श्रीमहिमा
नुरूपं प्रचक्रमे चक्रधरप्रभावः ॥५६॥ सा तीर्थसोपानपथावतारादन्योन्यकेयूरविघट्टिनीभिः ॥ सनूपुरक्षोभपदाभिरा
सीदुद्विग्नहंसा सरिदङ्गनाभिः ॥५७॥ परस्पराभ्युक्षणतत्पराणां तासां नृपो मज्जनरागदर्शी ॥ नौसंश्रयः पार्श्वगतां कि
रातीमुपात्तबालव्यजनां बभाषे ॥५८॥ पश्यावरोधैः शतशो मदीयैर्विगाह्यमानो गलिताङ्गरागैः ॥ संध्योदयः साभ्र इवैष
वर्णं पुष्यत्यनेकं सरयूप्रवाहः ॥५९॥ विलुप्तमन्तःपुरसुन्दरीणां यदञ्जनं नौलुलिताभिरद्भिः ॥ तद्बध्नतीभिर्मदरागशोभां वि
लोचनेषु प्रतिमुक्तमासां ॥६०॥ एता गुरुश्रोणिपयोधरत्वादात्मानमुद्वोढुमशक्नुवन्त्यः ॥ गाढाङ्गदैर्बाहुभिरप्सु बालाः क्लेशोत्त
रं रागवशात्प्लवन्ते ॥६१॥ अमी शिरीषप्रसवावतंसाः प्रभ्रंशिनो वारिविहारिणीनां ॥ पारिप्लवाः स्रोतसि निम्नगायाः शैवाल

राम: ६५

लोलान्नह्लयंति मीनान् ॥ ६२ ॥ आसां जलास्फालनतत्पराणां मुक्ताफलस्पर्द्धिषु शीकरेषु । पयोधरोत्सर्पिषु शीर्यमानः सं
लक्ष्यते न छिदुरोपि हारः ॥ ६३ ॥ आवर्त्तशोभा नतनाभिकांतेर्भंग्यो भ्रुवां द्वंद्वचराः स्तनानां । जातानि रूपावयवोपमाना
न्यदूरवर्त्तीनि विलासिनीनां ॥ ६४ ॥ तीरस्थलीबर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनंद्यमानं । श्रोत्रेषु संमूर्छति रक्तमा
सां गीतानुगं वारिमृदंगवाद्यं ॥ ६५ ॥ संदष्टवस्त्रेष्वबलानितंबेष्विंदुप्रकाशांतरितोडुकल्पाः । अमी जलापूरितसूत्रमार्गा मौनं
भजंते रसनाकलापाः ॥ ६६ ॥ एताः करोत्पीडितवारिधारा दर्पात्सखीभिर्वदनेषु सिक्ताः । वक्रेतराग्रैरलकैस्तरुण्यश्चू
र्णारुणान्वारिलवान्वमंति ॥ ६७ ॥ उद्बंधकेशश्च्युतपत्रलेखो विश्लेषिमुक्ताफलपत्रवेष्टः । मनोज्ञ एव प्रमदामुखाना
मंभोविहाराकुलितोपि वेषः ॥ ६८ ॥ स नौविमानादवतीर्य रेमे विलोलहारः सह ताभिरप्सु । स्कंधावलग्नोद्धृतपद्मिनी
कः करेणुभिर्वन्य इव द्विपेंद्रः ॥ ६९ ॥ ततो नृपेणानुगताः स्त्रियस्ता भ्राजिष्णुना सातिशयं विरेजुः । प्रागेव मुक्ता नयनाभि
रामाः प्राप्येंद्रनीलं किमुतोन्मयूखं ॥ ७० ॥ वर्णोदकैः कांचनशृंगमुक्तैस्तमायताक्ष्यः प्रणयादसिंचन् । तथागतः सोतित

र.वं.
६६

चांवभासेसर्पानुनिष्यंदद्रवाद्रिताङ्गः ॥७१॥ तेनावरोधप्रमदासखेन विगाहमानेन सरिद्वरिष्ठां ॥ आकाशगंगारतिरप्सरो
भिर्वृतो मरुत्वाननुयातलीलः ॥७२॥ यत्कुंभयोनेरधिगम्य रामः कुशाय राज्ये न समं दिदेश ॥ तदस्य जैत्राभरणं विहर्तु
रज्ञातपातं सलिले ममज्ज ॥७३॥ स्नात्वा यथाकाममसौ सदारस्तीरोपकार्यां गतमात्र एव ॥ दिव्येन शून्यं वलयेन बाहुम
पोढनेपथ्यविधिर्ददर्श ॥७४॥ जयश्रियः संवननं यतस्तदामुक्तपूर्वं गुरुणा च यस्मात् ॥ सेहे न तद्भ्रंशमतो न लोभात्सतु
ल्यपुष्पाभरणो हि धीरः ॥७५॥ ततः समाज्ञापयदाशु सर्वानानायिनस्तद्विचये नदीष्णान् ॥ वंध्यश्रमास्ते सरयूं विगा
ह्यतमूचुरम्लानमुखत्वानविंदे ॥७६॥ कृतः प्रयत्नो न च देव लब्धं मग्नं पयस्याभरणोत्तमं ते ॥ नागेन लौल्यात्कुमुदेन नूनमुपात्तमं
तर्ह्रदवासिना तत् ॥७७॥ ततः स कृत्वा धनुराततज्यं धनुर्धरः कोपविलोहिताक्षः ॥ गरुत्मतेतीरगतस्तरस्वी भुजंगनाशाय
समाददे स्त्रं ॥७८॥ तस्मिन्ह्रदः संहितमात्र एव क्षोभात्समाविद्धतरंगहस्तः ॥ रोधांसि निघ्नन्नवपातमग्नः करीव वन्यः परु राम:
षं ररास ॥७९॥ तस्मात्समुद्रादिव मथ्यमानादुद्वृत्तनक्रात्सहसोन्ममज्ज ॥ लक्ष्मीव सार्धं सुरराजवृक्षैः कन्यां पुरस्कृत्य भुजंगे ६६

गराजः ॥८०॥ विभूषणप्रत्युपहारहस्तमुपस्थितं वीक्ष्य विशांपतिस्तं । सौपर्णमस्त्रं प्रतिसंजहार प्रह्वेष्वनिर्बंधरुषो हि
संतः ॥८१॥ तं लोकनाथप्रभवं प्रभावात्कुशं द्विषामंकुशवद्विदित्वा । मानोन्नतेनाप्यभिवंद्य मूर्ध्ना मूर्धाभिषिक्तं कुमुदो
बभाषे ॥८२॥ अवैमि कार्यांतरमानुषस्य विष्णोः सुताख्यामपरां तनुं त्वां । सोहं कथं नाम तवाचरेयमाराधनीयस्य
धृतेर्विघातं ॥८३॥ कराभिघातोत्थितकंदुकेयमालोक्य बालातिकुतूहलेन । जवात्पतज्ज्योतिरिवांतरिक्षादादत्त जैत्रा
भरणं त्वदीयं ॥८४॥ तदेतदाजानुविलंबिना ते ज्याघातरेखाकिणलांछनेन । भुजेन रक्षापरिघेण भूमेरुपैतु योगं पु
नरंसलेन ॥८५॥ इमां स्वसारं च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमंतुं । आत्मापराधं नुदतीं चिराय शुश्रूषया पार्थिव पा
दयोस्ते ॥८६॥ इत्यूचिवानुपहृताभरणः क्षितीशं श्लाघ्यो भवान्स्वजन इत्यनुभाषितारं । संयोजयां विधिवदास समेतबंधुः क
न्यामयेन कुमुदः कुलभूषणेन ॥८७॥ तस्याः स्पृष्टे मनुजपतिना साहचर्याय हस्ते मांगल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य
दिव्यस्तूर्यध्वनिरुदचरद्व्यश्नुवानो दिगंतान्गंधोदग्रं तदनु ववृषुः पुष्पमाश्चर्यमेघाः ॥८८॥ इत्थं नागस्त्रिभुवनगुरोरौ

नसंमेपिलेपंलक्ष्वावंधुंतमपिवकुशः पंचमंतक्षकस्य ॥ एकःसंकामत्रिकुलस्यरिपोनसज्ञत्वैनितेयात्संतव्यालामवनिमपरः
पौरकांतःशशास ॥८८॥ इतिश्रीरघुवंशेमहाकाव्येश्रीकालिदासकृतौकुशकुमुद्वतीविवाहोनामषोडसःसर्गः ॥ अतिथिंनामकाकुत्स्था
त्पुत्रमापकुमुद्वती ॥ पश्चिमाद्यामिनीयामात्प्रसादमिवचेतना ॥१॥ सपितुःपितृमान्वंशंमातुश्चानुपमद्युतिः ॥ अपुना
त्सवितेवोभौमार्गावुत्तरदक्षिणौ ॥२॥ तमादौकुलविद्यानामर्थमर्थविदांवरः ॥ पश्चात्पार्थिवकन्यानांपाणिमग्राहयत्पि
ता ॥३॥ जात्यस्तेनाभिजातेनशूरःशौर्यवतांकुशः ॥ अमन्यतैकमात्मानमनेकंवशिनावशी ॥४॥ सकुलोचितमिंद्रस्यसाहा
यकमुपेयिवान् ॥ जघानसमरेदैत्यंदुर्जयंतेनचावधि ॥५॥ तंस्वसानागराजस्यकुमुदस्यकुमुद्वती ॥ अन्वगात्कुमुदानंदंशशांकु
मिवकौमुदी ॥६॥ तयोर्दिवस्पतेरासीदेकःसिंहासनार्द्धभाक् ॥ द्वितीयापिसखीशच्याःपारिजातांशभागिनी ॥७॥ तदात्मसं
भवंराज्येमंत्रिवृद्धाःसमादधुः ॥ स्मरंतःपश्चिमामाज्ञांभर्तुःसंग्रामयायिनः ॥८॥ तेतस्यकल्पयामासुरभिषेकायशिल्पिभिः
विमानंनवमुद्वेदिचतुस्तंभप्रतिष्ठितं ॥९॥ तत्रैनंहेमकुंभेषुसंभृतैस्तीर्थवारिभिः ॥ उपतस्थुःप्रकृतयोभद्रपीठोपवेशितं ॥१०॥

नदद्भिः स्निग्धगंभीरं तूर्यैराहतपुष्करैः ॥ अन्वमीयत कल्याणं तस्याविछिन्नसंततिं ॥११॥ दूर्वायवांकुरप्लक्षत्वगभिन्नपुटोत्त
रन ॥ ज्ञातिवृद्धप्रयुक्तान्सः भेजे नीराजनाविधीन् ॥१२॥ पुरोहितपुरोगास्तं जिष्णुं जैत्रैरथर्वभिः ॥ उपचक्रमिरे पूर्वम
भिषेक्तुं द्विजातयः ॥१३॥ तस्यौघमहती मूर्ध्नि निपतंती व्यरोचत ॥ सशब्दमभिषेकश्रीर्गंगेव त्रिपुरद्विषः ॥१४॥ स्तूयमानः
क्षणे तस्मिन्नलक्ष्यत स वंदिभिः ॥ प्रवृद्ध इव पर्जन्यः सारंगैरभिनंदितः ॥१५॥ तस्य सन्मंत्रपूताभिः स्नानमद्भिः प्रतीछतः ॥ ववृ
धे वैद्युतस्याग्नेर्वृष्टिसेकादिव द्युतिः ॥१६॥ स तावदभिषेकांते स्नातकेभ्यो ददौ वसु ॥ यावदेषां समाप्येरन्यज्ञाः पर्याप्तदक्षिणाः
१७ ॥ ते प्रीतमनसस्तस्मै यामाशिषमुदैरयन् ॥ सा तस्य कर्मनिर्वृत्तैः दूरं पश्चात्कृता फलैः ॥१८॥ बंधछेदं स बद्धानां वधार्हाणामव ५६
ध्यतां ॥ धुर्याणां च धुरो मोक्षास्तदादेशाद्यथेष्टगतयोऽभवन् ॥२०॥ ततः कक्षांतरन्यस्तं गजदंतासनं शुचि सोत्तरछद
मध्यास्त नेपथ्यग्रहणाय सः ॥२१॥ तं धूपाश्यानकेशांतं तोयनिर्णिक्तपाणयः ॥ आकल्पसाधनैस्तैस्तैरुपतस्थुः प्रसाधकाः
तस्य मुक्तागुणानद्धं मौलिमंतर्गतस्रजं ॥ प्रत्यूपुः पद्मरागेण प्रभामंडलशोभिना ॥२३॥ चंदनेनांगरागं च मृगनाभिसुगंधिना

र॰ सु॰
६८

समापयततत्रपुरुरूपंत्वंविमस्ततोवने ॥२४॥ आमुक्ताभरणः स्रग्वी हंसचिह्नदुकूलभाक् ॥ आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः ॥२५
नेपथ्यदर्शिनश्छायातस्यादर्शेहिरण्मये ॥ विरराजोदितेसूर्येमेरौकल्पतरोरिव ॥२६॥ सराजककुदव्यग्रपाणिभिः पार्श्ववर्त्ति-
भिः ॥ ययावुदीरितालोकः सुधर्मानवमांसभां ॥२७॥ वितानसहितंतत्रभेजेपैतृकमासनं ॥ चूडामणिभिरुद्घृष्टपादपीठंमहीक्षितां ॥२८
बभौभूयः कुमारत्वादधिराज्यमवाप्यसः ॥ लेखाभावादुपारूढः सामग्र्यमिवचंद्रमाः ॥२९॥ शुशुभेतेनचाक्रांतंमंगलायतनंमहत्
श्रीवत्सलक्षणंवक्षः कौस्तुभेनेवकेशवं ॥३०॥ प्रसन्नमुखरागंतंस्मितपूर्वाभिभाषिणं ॥ मूर्त्तिमंतममन्यंतविश्वासमनुजीविनः ॥३१
सपुरंपुरुहूतश्रीः कल्पद्रुमनिभध्वजं ॥ क्रममाणश्चकारद्यांनागेनैरावतौजसा ॥३२॥ तस्यैकस्योच्छ्रितंछत्रंमूर्द्धितेनामलत्विषा
पूर्वराजवियोगोष्मकृत्स्नस्यजगतोहृतं ॥३३॥ धूमादग्नेः शिखाः पश्चादुदयादंशवोरवेः ॥ सोतीत्यतेजसांवृत्तिंसममेवोत्थितो
गुणैः ॥३४॥ तंप्रीतिविशदैर्नेत्रैरन्वयुः पौरयोषितः ॥ शरत्प्रसन्नैर्ज्योतिर्भिर्विभावर्य्यइवध्रुवं ॥३५॥ अयोध्यादेवताश्चैनंप्रशस्ता- राम:
यतनार्चिताः ॥ अनुदध्युरनुध्येयंसान्निध्यैः प्रतिमागतैः ॥३६॥ यावन्नाश्यायतेवेदिरभिषेकजलाप्लुता ॥ तावदेवास्यवेलांतंप्रतापः ६८

ष्ठापदुःसहः ॥३७॥ वशिष्ठस्य गेहे ऽमेत्राः सायंकाले सुधन्विनः ॥ किं तत्साध्यं यदुभये साधयेयुर्न संगताः ॥३८॥ सधर्म्मस्थसखः शाश्व
दर्थिप्रत्यर्थिनां स्वयं ॥ ददर्श संशयच्छेद्यान्व्यवहारानतंद्रितः ॥३९॥ ततः परमभिव्यक्तसौमनस्यनिवेदितैः ॥ युयोज पाकाभिमुखै
र्भृत्यान्विज्ञापनाफलैः ॥४०॥ यदुवाच न तन्मिथ्या यद्ददौ न जहार तत् ॥ सोभूद्भग्नव्रतः शत्रूनुद्धृत्य प्रतिरोपयन् ॥४१॥ युज
स्तु तु गुणा न घोन भसेव विवर्द्धिताः ॥ नस्मिन्स्तुभ्रयसीं वृद्धिं नभस्ये नाइवापगाः ॥४२॥ वयोरूपविभूतीनामेकैकं मदकारणं
तानि तस्मिन्समस्तानि न चास्योत्सिषिचे मनः ॥४३॥ इत्थं जनितरागासु प्रकृतिष्वनुवासरं ॥ अक्षोभ्यः स नवोप्यासीद्दृढमूल इ
व द्रुमः ॥४४॥ अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यतः ॥ अतः सोभ्यंतरान्नित्यान्षट्पूर्वमजयद्रिपून् ॥४५॥ प्रसादाभिमुखे तस्मिं
श्चपलापि स्वभावतः ॥ निकषे हेमलेखेव श्रीरासीदनपायिनी ॥४६॥ कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितं ॥ अतः सिद्धिं
समेताभ्यामुभाभ्यामन्वियेष सः ॥४७॥ न तस्य मंडले राज्ञो न्यस्तप्रणिधिदीधितेः ॥ अदृष्टमभवत्किंचिद्व्यभ्रस्येव विवस्वतः
॥४८॥ रात्रिंदिवविभागेषु यदादिष्टं महीक्षितां ॥ तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥४९॥ मंत्रः प्रतिदिनं तस्य बभूव

म॰ बृ॰
६७

सहमं त्रिभिः ॥ न जातु कासेव्यमानो पिगुप्तहानः स्मृतस्मृते ५० ॥ पश्चेषु त्वेषु संसिप्ते न विज्ञानप नस्पते: ॥ सोपसर्वैर्जनैर्भग्ना
नयथा कालंस्वपन्नपि ॥ ५१ ॥ भव्यसुखाः समनो भाः पुसवे क्षान्विनस्तथाः ॥ गर्भशालिसाधर्मी राजस्यग्रहं विधेचिने ५२
त्रुपधे न प्रव वर्तेन ज्ञात्रूपचित्तोपिसः ॥ व्रह्मौनकी मुखैनैवपुस्या नेहि सचित्तसने ५३ ॥ दुर्गीणा दुर्गुहाराधासंतस्य चोद्ध
विवामपि ॥ नहिंसिं रोगजास्कंदीभयात्क्रिन्निगुहाशयः ॥ ५४ ॥ कामं प्रकृतिवैराग्यं सधःशामयितुं क्षमः ॥ यस्यकार्यः प्र
तीकारः सतैवो पपादयेत् ॥ ५५ ॥ शाकोद्वेवाभवधा त्राजस्य शाक्तिमतःसतः ॥ समीचराणसहायादिनो भः प्रार्थीदवानलः
५६ ॥ न धर्ममर्थकामाभ्यां बवाधेन च तेनमो ॥ नार्थकामेण कामं वा सोर्थेण सहशः त्रिषु ॥ ५७ ॥ तीनास्त्रुपकर्हीणा पुर्वश
निविकुर्वते ॥ तेनमध्यमशक्तीनिमित्राणिस्थापितानीमतेः ॥ ५८ ॥ प्रजात्मनोः पविनिह्विषम भादी नो बलाद्दले ॥ पयावज्जी
वत्लिवन्नुसतनस्तादास्यलोभया ॥ ५९ ॥ कोशदासन्वयणीयत्वमिति तस्यार्थसंग्रहः ॥ चुंबुगर्भो हि जीमतः ज्ञातकैर्नभिने राम:
धते ६० ॥ पनकर्मापहः सोभडधतः स्वेषु कर्मसु ॥ ज्ञावणोदात्मणोनं बंधुं नेधेषु प्रहनद्विषः ॥ ६१ ॥ पिज्ञासंवर्द्धितो निसंह ६७

नास्तु संपन्नायकः ॥ अस्पंदं दंडवतो दंडः स्वदेहान्नावशिष्यत ॥६२॥ सर्पस्येव शिरश्छायां रत्ने नास्य शक्तित्रयं परः ॥ स चकर्ष परस्मा
त्तदयस्कांत इवायसं ॥६३॥ वापीष्विव स्रवंतीषु वनेषूपवनेष्विव ॥ सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु ॥६४॥ तपो
रक्षन्स विघ्नेभ्यस्तस्करेभ्यश्च संपदः ॥ यथास्वमाश्रमैश्चक्रे वर्णैरपि षडंशभाक् ॥६५॥ खनिभिः सुषुवे रत्नं क्षेत्रैः सस्यं वनै
र्गजान् ॥ दिदेश वेतनं तस्मै रक्षासदृशमेव भूः ॥६६॥ स बलानां गुणानां च षण्णां षण्मुखविक्रमः ॥ बभूव विनियोगज्ञः
साधनीयेषु वस्तुषु ॥६७॥ इति क्रमात्प्रयुंजानो राजनीतिं चतुर्विधां ॥ आतीर्थादप्रतीघातं स तस्याः फलमानशे ॥६८॥
कूटयुद्धविधिज्ञेऽपि तस्मिन्सन्मार्गयोधिनि ॥ भेजेऽभिसारिकावृत्तिं जयश्रीर्वीरकामिनी ॥६९॥ प्रायः प्रतापभग्न
त्वादरीणां तस्य दुर्लभः ॥ रणो गंधद्विपस्येव गंधभग्नान्यदंतिनः ॥७०॥ प्रवृद्धौ हीयते चंद्रः समुद्रोऽपि तथाविधः ॥
स तु तत्समवृद्धिश्च न चाभूत्ताविव क्षयी ॥७१॥ संतस्तस्याभिगमनादत्यर्थं महतः कृशाः ॥ उदधेरिव जीमूताः प्राप
र्दातृत्वमर्थिनः ॥७२॥ स्तूयमानः स जिह्राय स्तुत्यमेव समाचरन् ॥ तथापि ववृधे तस्य तत्कारिद्वेषिणो यशः ॥७३॥ ६

र·वं·
७०

त्रितंदर्शनेनद्रुमस्तत्वार्थेनतुदंडतमः॥ प्रजाःसंवर्धयांचक्रेशश्वत्तत्पयइवोदितः॥ ७४॥ इंदोनगतयःपद्मेसूर्यस्य
कुमुदेंशवः॥ गुणास्तस्याविपक्षेपिगुणिनोलेभिरेंतरे॥ ७५॥ पराभिसंधानपरंयद्यप्यस्यविचेष्टितं॥ विजीगीषोन
श्वमेधायधर्म्यमेवबभूवतत्॥ ७६॥ एवमुघन्प्रभावेनशास्त्रनिर्दिष्टवर्त्मना॥ वृषेवदेवोदेवानांनज्ञाराज्ञांबभूवसः॥
पंचमंलोकपालानामूचुःसाधर्म्ययोगतः॥ भूतानांमहतांषष्ठमष्टमंकुलःभूभृतां॥ ७८॥ दूरापवर्जितछत्रैस्तस्या
ज्ञांशासनार्पितां॥ दधुःशिरोभिर्भूपालादेवाःपौरंदरीमिव॥ ७९॥ ऋत्विजःसतथानर्चदक्षिणाभिर्महाक्रतौ॥
यथासाधारणीभूतंनामस्यधनदस्यच॥ ८०॥ इंद्राद्वृष्टिर्नियमितगदोद्रेकवृत्तिर्यमोभूत्यादोनाथःकर्मणे
नौचराणां॥ पूर्वापेक्षीतदनुविदधेकोशवृद्धिंकुबेरस्तस्मिन्दंडोपनतचरितंभेजिरेलोकपालाः॥ ८१॥ ॐ

रामः
७०

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ अतिथिराज्यवर्णनो नाम सप्तदशः सर्गः ॥१७॥ स नैषधस्यार्थपतेः सुतायामुत्पादयामास निषिद्धश
त्रुः ॥ अनूनसारं निषधान्नगेंद्रात्पुत्रं यमाहुर्निषधाख्यमेव ॥१॥ तेनोरुवीर्येण पिता प्रजायै कल्पिष्यमाणेन ननंद यूना ॥ सुवृष्टियोगादि
व जीवलोकः सस्येन संपत्तिफलात्मकेन ॥२॥ शब्दादि निर्विश्य सुखं चिराय तस्मिन्प्रतिष्ठापितराजशब्दः ॥ कौमुद्वतेयः कुमुदावदातै
र्द्यामर्जितां कर्मभिरारुरोह ॥३॥ पौत्रः कुशस्यापि कुशेशयाक्षः ससागरां सागरधीरचेताः ॥ एकातपत्रां भुवमेकवीरः पुरार्गलादी
र्घभुजो बुभोज ॥४॥ तस्यानलौजास्तनयस्तदन्ते वंशश्रियं प्राप नलाभिधानः । यो नड्वलानीव गजः परेषां बलान्यमृद्नान्नलिनाभवक्त्रः ॥५॥ नभश्चरैर्गीतयशाः स लेभे नभस्तलश्यामतनुं तनूजं ॥ ख्यातं नभः
शब्दमयेन नाम्ना कांतं नभोमासमिव प्रजानां ॥६॥ तस्मै विसृज्योत्तरकोशलानां धर्मोत्तरस्तत्प्रभवे प्रभुत्वं ॥ मृगैरजर्यं जरसोप
दिष्टमदेहबंधाय पुनर्बबंध ॥७॥ तेन द्विपानामिव पुंडरीको राज्ञामजय्योऽजनि पुंडरीकः ॥ शांते पितर्याहृतपुंडरीकं यं पुंडरीका
क्षमिव श्रिता श्रीः ॥८॥ स क्षेमधन्वानममोघधन्वा पुत्रं प्रजाक्षेमविधानदक्षं ॥ क्ष्मां लंभयित्वा क्षमयोपपन्नं वने तपः क्षांततरश्च
चकार ॥९॥ अनीकिनीनां समरेऽग्रयायी तस्यापि देवः प्रतिमः सुतोऽभूत् ॥ व्यश्रूयतानीकपदावसानं देवादि नाम त्रिदिवेऽपि यस्य ॥ १.
पिता समाराधनतत्परेण पुत्रेण पुत्री स यथैव तेन ॥ पुत्रस्तथैवात्मजवत्सलेन स तेन पित्रा पितृमान्बभूव ॥११॥ पूर्वस्तयोरात्मसम

र.वं.
७१

मेचिरोढामात्मोद्भवे वर्णचतुष्टयस्य ॥ धुरं निधायैकनिधिर्गुणानां जगाम यज्वा यजमानलोकं ॥१२॥ वशी सुतस्तस्य वशंवद
त्वात्स्वेषामिवासीद्द्विषतामपीष्टः ॥ सकृद्विविग्नानपि हि प्रयुक्तं माधुर्यमीष्टे हरिणान्ग्रहीतुं ॥१३॥ अहीनगुर्नाम स गां स
मग्राममहीनबाहुद्रविणः शशास ॥ यो हीनसंसर्गपराङ्मुखत्वाद्युवाप्यनर्थैर्व्यसनैर्विहीनः ॥१४॥ गुरोः स चानंतरमंतरज्ञः
पुंसां पुमानाद्य इवावतीर्णः ॥ उपक्रमैरस्खलितैश्चतुर्भिश्चतुर्दिगीशश्चतुरो बभूव ॥१५॥ तस्मिन्प्रयाते परलोकयात्रां जे
तर्यरीणां तनयं तदीयं ॥ उच्चैःशिरस्त्वाज्जितपारियात्रं लक्ष्मीः सिषेवे किल पारियात्रं ॥१६॥ तस्माद्बभूवाप्य दलाभिधानो द
यान्वितः पद्मदलाभहस्तः ॥ कुंदाग्रदंतो रिपुदंतिसिंहः पवित्रः पुण्यश्याः कुलकैरवेंदुः ॥१७॥ तस्याभवत्सूनुरुदारशीलः शी
लः शिलापट्टविशालवक्षाः ॥ जितारिपक्षोपि शिलीमुखैर्यः शालीनतामव्रजदीड्यमानः ॥१८॥ तमात्मसंपन्नमनिंदितात्म
कृत्वा युवानं युवराजमेव ॥ सुखानि सोऽभुंक्त सुखोपरोधि वृत्तं हि राज्ञामुपरुद्धवृत्तं ॥१९॥ तं रागबंधिष्ववितृप्तमेव भोगेषु सौभा
ग्यविशेषभोग्यं ॥ विलासिनीनामरतिक्षमापि जरा वृथा मत्सरिणी जहार ॥२०॥ हित्वाप्यभोगांस्तपसोत्तमेन त्रिविष्टपं प्राप्तव
त्सितीशे ॥ तदात्मजः सागरधीरचेताः शशास सप्तद्वीपसकलां नसोमः ॥२१॥ उन्नाभ इत्युन्नतनामधेयस्तस्यापि पापार्दनतता

रामः
७१

निरुद्धः आसीत्सुतः पंकजनाभिकल्पः कृत्स्नस्य नाभिर्नृपमंडलस्य ॥२२॥ ततः परं वज्रधरप्रभावस्तस्यात्मजः संयति वज्रघोषः
बभूव वज्राकरभूषणायाः पतिः पृथिव्याः किल वज्रनाभः ॥२३॥ तस्मिन्गते द्यां सुकृतोपलब्धां तत्संभवं शंखणमर्णवांताः ॥ उत्खा
तशत्रुं वसुधोपतस्थे रत्नोपहारैरुदितैः खनिभ्यः ॥२४॥ तस्यावसाने हरिदश्वधामा पित्र्यं प्रपेदे पदमश्विरूपः ॥ वेलातटेषूषि
तसैनिकाश्वं पुराविदो यं व्युषिताश्वमाहुः ॥२५॥ आराध्य विश्वेश्वरमीश्वरेण तेन क्षितेर्विश्वसहो विजज्ञे ॥ पातुं सहो विश्व
सखः समग्रां विश्वंभरामात्मजमूर्तिरात्मा ॥२६॥ अंशे हिरण्याक्षरिपोः स जाते हिरण्यनाभे तनये नयज्ञः ॥ द्विषामसह्यः सु
तरां तरूणां हिरण्यरेता इव सानिलोऽभूत् ॥२७॥ पिता पितॄणामनृणस्तमंते वयस्यनंतानि सुखानि लिप्सुः ॥ राजानमाजा
नुविलंबिबाहुं कृत्वा कृती वल्कलवान्बभूव ॥२८॥ कौशल्य इत्युत्तरकोशलानां पत्युः पतंगान्वयभूषणस्य ॥ तस्यौरसः
सोमसुतः सुतोऽभून्नेत्रोत्सवः सोम इव द्वितीयः ॥२९॥ यशोभिराब्रह्मसभं प्रकाशः स ब्रह्मभूयं गतिमाजगाम ॥ ब्रह्मिष्ठमाधा
य निजेऽधिकारे ब्रह्मिष्ठमेव स्वतनुप्रसूतं ॥३०॥ तस्मिन्कुलापीडनिभे विपीडं सम्यङ्महीं शासति शासनांकां ॥ प्रजाश्चिरं सुप्रजसि प्र
जेशे ननंदुरानंदजलाविलाक्ष्यः ॥३१॥ पात्रीकृतात्मा गुरुसेवनेन स्पष्टाकृतिः पत्ररथेंद्रकेतोः ॥ तं पुत्रिणां पुष्करपत्रनेत्रः पुत्रः

र॰ वं॰
७२

समारोपपदग्रमंस्वां ॥३२॥ वंशस्थितिंवंशकरेणतेनसंभाव्यभावीससखामघोनः। उपस्पृशन्स्पर्शनिवृत्तलौल्यस्त्रिपुष्क
रेषुत्रिदशत्वमाप ॥३३॥ तस्यप्रभानिर्जितपुष्परागंपौष्यांतिथौपुष्यमसूतपत्नी। यस्मिन्नपुष्यन्नुदितेसमग्रांपुष्टिं
जनाःपुष्यइवद्वितीये ॥३४॥ महींमहेच्छःपरिकीर्यसूनौमनीषिणेजैमिनयेर्पितात्मा। तस्मात्सयोगादधिगम्ययोग
मजन्मनेकल्पतजन्मभीरुः ॥३५॥ ततःपरंतत्प्रभवःप्रपेदेध्रुवोपमेयोध्रुवसंधिरुर्वीं। यस्मिन्नभूज्ज्यायसिसत्यसंधेसंधिर्ध्रुवःसन्नम
तामरीणां ॥३६॥ सुतेशिशावेवसुदर्शनाख्येदर्शात्ययेंदुप्रियदर्शनेसः। मृगायताक्षोमृगयाविहारीसिंहादवापद्विपदंनृसिंहः
॥३७॥ स्वर्गामिनस्तस्यतमैकमत्यादमात्यवर्गःकुलतंतुमेकं। अनाथदीनाःप्रकृतीरवेक्ष्यसाकेतनाथंविधिवच्चकार ॥३८॥ नवेंदु
नातन्नभसोपमेयंशावैकसिंहेनचकाननेन। रघोःकुलंकुड्मलपुष्करेणतोयेनचाप्रौढनरेंद्रमासीत् ॥३९॥ लोकेनभावीपि
तुरेवतुल्यःसंभावितोमौलिपरिग्रहात्सः। दृष्टोहिवृण्वन्कलभप्रमाणोप्याशाःपुरोवातमवाप्यमेघः ॥४०॥ तंराजवीथ्यामधिह
स्तियंतमाधोरणालंबितमग्र्यवेशं। षड्वर्षदेशीयमपिप्रभुत्वात्प्रैक्षंतपौराःपितृगौरवेण ॥४१॥ कामंनसोकल्पतपैतृकस्यसिंहा
सनस्यप्रतिपूरणाय। तेजोमहिम्नापुनरावृतात्मातद्व्यापचामीकरपिंजरेण ॥४२॥ तस्मादधःकिंचिदिवावतीर्णावसंस्पृशंतौतपनीयपीठं

राम:
७२

लातनौकोपनयः प्रसिद्धैर्ववंदिरे मौलिभिरस्य पादौ ॥४३॥ स लोमहानील इति प्रभावादल्पप्रमाणोपि यथा न जात्या ॥ शब्दो म
हाराज इति प्रयुक्तस्तथैव तस्मिन्युयुजेर्भकेपि ॥४४॥ पर्यस्तमस्यामरचामरस्य कपोललोलोभयकाकपक्षात् ॥ तस्याननादुच्चरि
तो विवादश्चस्खाल वेलास्वपि नार्णवानां ॥४५॥ निर्वृत्तजांबूनदपट्टशोभे न्यस्तं ललाटे तिलकं दधानः ॥ तेनैव शून्यान्यरिसुंद
रीणां मुखानि स स्मेरमुखश्चकार ॥४६॥ शिरीषपुष्पाधिकसौकुमार्यः खेदं स यायादपि भूषणेन ॥ नितांतगुर्वीमपि सोनुभा
वाद्धुरं धरित्र्या बिभरांचकार ॥४७॥ न्यस्ताक्षरामक्षरभूमिकायां कार्त्स्न्येन गृह्णाति लिपिं न यावत् ॥ तावत्फलानि श्रुतवृद्धयो
गात्सर्वाण्युपायुंक्त स दंडनीतेः ॥४८॥ उरस्यपर्याप्तनिवेशभागा प्रौढीभविष्यंतमुदीक्षमाणा ॥ संजातलज्जेव तमातपत्र
च्छायाछलेनोपजुगूह लक्ष्मीः ॥४९॥ अनिष्टवानेव युगोपमानमबद्धमौर्वीकिणलांछनेन ॥ अस्पृष्टखड्गत्सरुणापि चासीद्
रक्षावती तस्य भुजेन भूमिः ॥५०॥ न केवलं गच्छति तस्य काले ययुः शरीरावयवा विवृद्धिं ॥ वंश्या गुणाः खल्वपि लोककांताः प्रारं
भसूक्ष्माः प्रथिमानमापुः ॥५१॥ स पूर्वजन्मांतरदृष्टपाराः स्मरन्निवाक्लेशकरो गुरूणां ॥ तिस्रस्त्रिवर्गाधिगमस्य मूलं जग्राह विद्याः प्रकृतीश्च पि
त्र्याः ॥५२॥ व्यूह्य स्थितः किंचिदिवोत्तरार्धमुन्नद्धचूडोंचितसव्यजानुः ॥ आकर्णमाकृष्टसबाणधन्वा व्यरोचतमा

र० वं०
८३

स्थेषु विनीयमानः ॥५३॥ प्रपौत्रमध्रुवसन्धिनाम्नो नेत्रनिर्वैवपेयं मनत्तिनरत्पुष्पं रागवन्धिषु बाल्यं ॥ अकृतकविधिसर्वांगीणमाक
ल्पजातं विलसितपदमाद्यं यौवनं लब्धपूर्वे ॥५४॥ प्रतिकृतिरचनाभ्यो दूतिसंदर्शिताभ्यः समधिकतररूपाः शुद्धसंतानकामैः
अधिविविदुरमात्यैराहृतास्तस्य यूनः प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ॥५५॥ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
अष्टादशसर्गः ॥१८॥ अग्निवर्णमभिषिच्य राघवः स्वे पदे तनयमग्नितेजसं शिश्रिये श्रुतवतामपश्चिमः पश्चिमे वयसि नैमि
षं वशी ॥१॥ तत्र तीर्थसलिलेन दीर्घिकास्तल्पमन्तरितभूमिभिः कुशैः सौधवासमुटजेन विस्मरन् संचिकाय फलनिस्पृह
स्तपः ॥२॥ लब्धपालनविधौ न तत्सुतः खेदमाप गुरुणा हि मेदिनी ॥ भोक्तुमेव भुजनिर्जितद्विषा न प्रसाधितुमस्य कल्पिता ३
सोधिकारमभिकः कुलोचितं कांश्चन स्वयमवर्त्तयत्समाः तन्निवेश्य सचिवेष्वतः परं स्त्रीविधेयनवयौवनोभवत् ॥४॥ कामिनी
सहचरस्य कामिनस्तस्य वेश्मसु मृदंगनादिषु ॥ ऋद्धिमन्तमधिकर्द्धिरुत्तरः पूर्वमुत्सवमपोहदुत्सवः ॥५॥ इन्द्रियार्थपरिशून्यम
क्षमः सोढुमेकमपि सः क्षणान्तरं ॥ अन्तरेव विहरन् दिवानिशं न व्यपैक्षत समुत्सुकाः प्रजाः ॥६॥ गौरवाद्यदपि जातु मन्त्रिणां दर्श
नं प्रकृतिकांक्षितं ददौ ॥ तद्गवाक्षविवरावलम्बिना केवलेन चरणेन कल्पितं ॥७॥ तं कृतप्रणतयोनुजीविनो कोमलात्मनखरा

रामः
८३

रागभृतिवितं भेजिरे नवदिवाकरातपस्पृष्टपंकजतुलाधिरोहणं ॥८॥ यौवनोन्नतविलासिनीस्तनक्षोभलोलकमलाश्च दी
र्घिकाः गूढमोहनगृहास्तदंबुभिः स व्यगाहत विगाढमन्मथः ॥९॥ तत्र सेकहृतलोचनांजनैर्धौतरागपरिपाटलाधरैः ॥ अं
गनास्तमधिकं व्यलोभयन्नर्पितप्रकृतिकांतिभिर्मुखैः ॥१०॥ घ्राणकांतमधुगंधकर्षिणीः पानभूमिरचनाः प्रियासखः
अभ्यपद्यत स वासितासखः पुष्पिताः कमलिनीरिव द्विपः ॥११॥ सातिरेकमदकारणं रहस्तेन दत्तमभिलेषुरंगनाः ताभि
रप्युपहृतं मुखासवं सोपिबद्बकुलतुल्यदोहदः ॥१२॥ अंकमंकपरिवर्त्तनोचिते तस्य निन्यतुरशून्यतामुभे ॥ वल्लकी च हृ
दयंगमस्वना वल्गुवागपि च वामलोचना ॥१३॥ स स्वयं प्रहतपुष्करः कृती लोलमाल्यवलयो हरन्मनः ॥ नर्त्तकीरभिन
याभिलंघिनीः पार्श्ववर्त्तिषु गुरुष्वलज्जयत् ॥१४॥ चारु नृत्यविगमे च तन्मुखं स्वेदभिन्नतिलकं परिश्रमात् ॥ प्रेमदत्तवदनानि
लः पिबन्नत्यजीवदमरालकेश्वरौ ॥१५॥ तस्य सावरणदृष्टसंधयः काम्यवस्तुषु नवेषु संगिनः ॥ वल्लभाभिरुपसृत्य चक्रि
रे सामिभुक्तविषयाः समागमाः ॥१६॥ अंगुलीकिसलयाग्रतर्जनं भ्रूविभंगकुटिलं च वीक्षितं ॥ मेखलाभिरसकृच्च बंधनं वं
चयन्प्रणयिनीरवाप सः ॥१७॥ तेन दूतिविदितं निषेदुषा पृष्ठतः सुरतवाररात्रिषु ॥ शुश्रुवे प्रियजनस्य कातरं वि

1

१

र॰वं॰ ७५

ह्रितमपि प्रियं किमोचवः ॥१८॥ सौस्नमेत्य गृहिणीपरिग्रहान्नर्तकीष्वसुलभासु तद्वपुः ॥ वर्तते स्म स कथंचिदालिखन्नंगुलीस
रणसन्नवर्तिकः ॥१९॥ प्रेमगर्वितविपक्षमत्सरादायताच्चमदनान्महीक्षितं निन्युरुत्सवविधिछलेन तं देव्यउज्झितरुषः
कृतार्थतां ॥२०॥ प्रातरेत्य परिभोगशोभिना दर्शनेन कृतखंडनव्यथाः ॥ प्रांजलिः प्रणयिनीः प्रसादयन्सोऽदुनोत्प्रणयमंथरः
पुनः ॥२१॥ स्वप्नकीर्तितविपक्षमंगनाः प्रत्यभैत्सुरवदंत्य एव तं ॥ प्रच्छदांतगलिताश्रुबिंदुभिः क्रोधभिन्नवलयैर्विवर्तनैः ॥२२॥
क्लृप्तपुष्पशयनांल्लतागृहानेत्य दूतिकृतमार्गदर्शनः ॥ अन्वभूत्परिजनांगनारतं सोऽवरोधभयवेपथूत्तरं ॥२३॥ नाम वल्ल
भजनस्य ते मया प्राप्य भाग्यमपि तस्य कांक्ष्यते ॥ लोलुपं वत मनो ममेति तं गोत्रविस्वलितमूचुरंगनाः ॥२४॥ चूर्णबभ्रु
लुलितस्रगाकुलं छिन्नमेखलमलक्तकांकितं ॥ उत्थितस्य शयनं विलासिनस्तस्य विभ्रमरतान्यपावृणोत् ॥२५॥ स स्व
यं चरणरागमादधे योषितां न च तथा समाहितः ॥ लोभ्यमाननयनः श्लथांशुकैर्मेखलागुणपदैर्नितंबिभिः ॥२६॥ चुंबने
विपरिवर्तिताधरं हस्तरोधि रसनाविघट्टने ॥ विघ्नितेच्छमपि तस्य सर्वतो मन्मथेंधनमभूद्वधूरतं ॥२७॥ दर्पणेषु परिभोग
दर्शिनीर्नर्मपूर्वमनुपृष्ठसंस्थितः ॥ छायया स्मितमनोज्ञया वधूर्ह्रीनिमीलितमुखीश्चकार सः ॥२८॥ कंठसक्तमृदुबाहुबंधनं

राम: ७५

न्यस्तपादतलमग्रपादयोः ॥ प्रार्थयंतिशयनोत्थिताःप्रियास्तंनिशात्ययविसर्जनचुंबनं ॥ २९ ॥ वेश्मदर्पणतलस्थमात्मनोराज
वेशमात्मसदृशंशोभिनं ॥ पिप्रियेसनततपायपायपाभुवाव्यक्तलक्ष्मीपरिभोगमंडले ॥ ३० ॥ मित्रकृत्यमपदिश्यपार्श्वतःप्रस्थितंतम
नवस्थितंप्रियाः ॥ विद्महेशठपलायनछलान्यंजसेतिरुरुधुःकचग्रहैः ॥ ३१ ॥ तस्यनिर्दयरतिश्रमालसाःकंठसूत्रमपवि
ध्याययोषितः ॥ अध्यशेरतबृहद्भुजांतरंपीवरस्तनविलुप्तचंदनं ॥ ३२ ॥ संगमायनिशिगूढचारिणंचारदूतिकथितंपुरोगताः
वंचयिष्यसिकुतस्तमोवृताःकामुकेतिचकृषुस्तमंगनाः ॥ ३३ ॥ योषितामुडुपतेरिवार्चिषांस्पर्शनिर्वृतिमसाववाप्नुवन् आरुरोह
कुमुदाकरोपमांरात्रिजागरपरोदिवाशयः ॥ ३४ ॥ वेणुनादशनपीडिताधराःवीणयानखपदांकितोरवः ॥ शिल्पकार्यउभये
नवेजितास्तंविजिह्मनयनाःव्यलोभयन् ॥ ३५ ॥ अंगसत्ववचनाश्रयंमिथःस्त्रीषुनृत्यमुपधायदर्शयन् ॥ सप्रयोगनिपुणैःप्र
योक्तृभिःसंजघर्षसहमित्रसन्निधौ ॥ ३६ ॥ अंसलंबिकुटजार्जुनस्रजस्तस्यनीपरजसांगरागिणः ॥ प्रावृषिप्रमदबर्हिणेष्व
भूत्कृत्रिमाद्रिषुविहारविभ्रमः ॥ ३७ ॥ विग्रहाच्चशयनेपराङ्मुखीर्नानुनेतुमबलाःसतत्वरे ॥ आचकांक्षघनशब्दविक्लवा
स्ताविवृत्यविशतीर्भुजांतरं ॥ ३८ ॥ कार्त्तिकीषुसवितानहर्म्यभाग्यामिनीषुललितांगनासखः ॥ अन्वभुंक्तसुरतश्रमाप

र॰वं॰
७५

परूं मेघमुक्तविशदां सचंद्रिकां ॥ ३९ ॥ सैकतं च सरयूं विवृण्वतीं श्रोणिबिंबमिव हंसमेखलं ॥ स्वप्रियाविलसितानुकारि-
णीं सौधजालविवरैर्व्यलोकयत् ॥ ४० ॥ मर्मरैरगुरुधूपगंधिभिर्व्यक्तहेमरशनैस्तमेकतः ॥ जहुरग्रथनमोक्षलोलुपं हैमनैर्नि-
वसनैः सुमध्यमाः ॥ ४१ ॥ अर्पितस्तिमितदीपदृष्टयो गर्भवेश्मसु निवातकुक्षिषु तस्य सर्वसुरतांतरक्षमाः साक्षितां शिशिररा-
त्रयो ययुः ४२ दक्षिणेन पवनेन संभृतं प्रेक्ष्य चूतकुसुमं सपल्लवं ॥ अन्वनैषुरविकीर्णविग्रहास्तं दुरुत्सहवियोगमंगनाः ४३
ताः स्वमंकमधिरोप्य दोलया प्रेंखयन् परिजनापविद्धया मुक्तरज्जु निबिडं भयच्छलात्कंठबंधनमवाप बाहुभिः ॥ ४४ ॥ तं पयोध-
रनिषिक्तचंदनैर्मौक्तिकग्रथितचारुभूषणैः ॥ ग्रीष्मवेषविधिभिः सिषेविरे श्रोणिलंबिमणिमेखलैः प्रियाः ॥ ४५ ॥ यत्स भग्नस-
हकारमासवं रक्तपाटलसमागमं पपौ तेन तस्य मधुनिर्गमात्कृशश्चित्तयोनिरभवत्पुनर्नवः ॥ ४६ ॥ एवमिंद्रियसुखानि निर्वि-
शन्नन्यकार्यविमुखः स पार्थिवः ॥ आत्मलक्षणनिवेदितानृतूनत्यवाहयदनंगमोहितः ॥ ४७ ॥ तं प्रमत्तमपि प्रभावतः शेकुराक्रमितु-
मन्यपार्थिवाः ॥ आमयस्तु रतिरागसंभवो दक्षशाप इव चंद्रमक्षिणोत् ॥ ४८ ॥ दृष्टदोषमपि तन्न सोऽत्यजत्संगवस्तु भिषजामनाश्रवः
स्वादुभिस्तु विषयैर्हृतस्ततो दुःखमिंद्रियगणो निवार्यते ॥ ४९ ॥ तस्य पांडुवदनाल्पभूषणा सावलंबगमना मृदुस्वना यक्ष्मणोऽप

रामः
७५

रिहाणिराययौ कामयानसमवस्थया तुलां ॥५०॥ व्योमपश्चिमकलास्थितेंदु पंकशेषमिव घर्मपल्वलं ॥ राज्ञि तत्कुलमभूत्क्षया
र॰ वुं॰ तुरे वामनार्चिरिव दीपभाजनं ॥५१॥ बाढमेषु दिवसेषु पार्थिवः कर्म साधयति पुत्रजन्मने ॥ इत्यदर्शितरुजोस्य मंत्रिणः शश्वदू
७६ चुरघशंकिनीः प्रजाः ॥५२॥ स त्वनेकवनितासखोपि सन्पावनीमनवलोक्य संततिं ॥ वैद्ययत्नपरिभाविनं गदं न प्रदीपमिव वायुरत्य
गात् ॥५३॥ तं गृहोपवन एव संगताः पश्चिमक्रतुविदा पुरोधसा ॥ रोगशांतिमपदिश्य मंत्रिणः संभृते शिखिनि गूढमादधुः ॥५४॥
तैः कृतप्रकृतिमुख्यसंग्रहैराशु तस्य सहधर्मचारिणी ॥ साधुदृष्टशुभगर्भलक्षणा प्रत्यपद्यत नराधिपश्रियं ॥५५॥ तस्यास्तथाविध
नरेंद्रविपत्तिशोकादुष्णैर्विलोचनजलैः प्रथमाभितप्तः ॥ निर्वापितः कनककुंभमुखोज्झितेन वंशाभिषेकविधिना शि
शिरेण गर्भः ॥५६॥ तं भावार्थं प्रसवसमयाकांक्षिणीनां प्रजानामंतर्गूढं क्षितिरिव नभोबीजमुष्टिं दधाना ॥ मौलैः सार्द्धं स्थविरसचिवै राम:
र्हेमसिंहासनस्था राज्ञी राज्यं विधिवदशिषद्भर्तुरव्याहताज्ञा ॥५७॥ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ एकोनविंशतिः ७६
सर्गः ॥१९॥ पौषमासकृष्णपक्षे तिथ्यौ तृतीय चंद्रवासरे ॥ शुभं ॥ श्लोकैर्विमकरंदेन कालिदासस्य पंकृति १ संवत १८६२

[illegible]

[illegible] ॥ श्री राम॥

115

16(B)